© 2018 IJSRSET | Volume 4 | Issue 7 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099

# प्राचीनभारतीयशास्त्रान्तरेषु संज्ञानविमर्शनम्



**प्रज्ञा चतुर्वेदी**
शोधच्छात्रा
राष्ट्रिय–संस्कृत–संस्थानम्,
भोपाल परिसरः, भोपाल (म.प्र.)

**प्रस्तावना–** विश्वस्मिन् विश्वे मानवः सर्वश्रेष्ठः प्राणी वर्तते। मानवोऽयं सर्वमपि असाध्यं कार्यं कर्तुं प्रभवति। मानवेऽस्मिन् शौर्यधैर्यादयः गुणाः शोभन्ते तथापि दुःखसुखादयः विकाराः अपि दृश्यन्ते। तथापि मानवस्यास्य महिमा महोत्कृष्टः इति अथर्ववेदे विद्यते–

**उद्वयं तमसस्परि स्व पश्यन्तो ज्योतिरुतरम्।**
**देनं देवत्रा सूर्यमगन्म ज्योतिस्तमम्।। अ.वे. 2/11/15**

आदिकालादेव मानवः आत्मनः ज्ञातुं मनोविज्ञानस्य साहाय्यं स्वीकरोति मनोविज्ञानं तु एकं विशिष्टं गम्भीरं च शास्त्रं भवति। इदं शास्त्रं मानवेन सम्बद्धमस्ति। अस्मिन् शास्त्रे मानवस्य व्यवहारस्य वैज्ञानिकमध्ययनं क्रियापदं ऐदम्प्राथम्येन मनोविज्ञानं तु आत्मनो विज्ञानत्वेन अङ्गीकृतम्। साम्प्रतं शास्त्रमिदं व्यवहारशास्त्रतत्वेन स्वीकृतम्। भारतीयशास्त्रेषु मनोविज्ञानविषयकानि नैकानि तत्वानि सन्ति। तत्र मनः, बुद्धिः, चेतना, स्वप्नः, संवेगः, संज्ञानादीनां, मनोवैज्ञानिकतत्वानां विशदं वर्णनं प्राप्यते। संज्ञानम् आधुनिकमनोविज्ञानविचारः। वस्तुतः संज्ञानं तु एका मानसिकी प्रक्रिया वर्तते। अस्य संज्ञानस्य, प्राचीनभारतीयशास्त्रेषु विभिन्नरुपेषु परिलक्षणं दृश्यते। इदं संज्ञानं तु ज्ञानं, बुद्धिः तर्कः, चिन्तनं, मननं, जिज्ञासा, कल्पना, निर्णयः विश्लेषणं इत्यादीनां मानसिकप्रक्रियाणां रुपेषु विद्यते। किंच संज्ञानस्य विमर्शनस्य प्रमाणानि वेद–उपनिषद्–भगवद्गीता–स्मृति– आदि आर्ष ग्रन्थेषु प्राप्यन्ते। संज्ञानपक्षे मानवः ज्ञानात्मकं तत्वसम्बद्धानाम् अध्ययनं विदधाति। व्यक्तेः जीवनस्य प्रत्येकं क्रिया बुद्धि कयोः आधारोपरि किमपि कार्यं परिणति। उक्तं च ऐतरयोपनिषदि– 111/2

संज्ञानं आज्ञानं विज्ञानं मेधा दृष्टिः धृति मतिः मनीषा जुतिः स्मृति संकल्प ऋतुः असुः। कामः वशः सर्वाण्ये वैज्ञानिकप्रज्ञानस्यः। नामधेयानि भव।

अस्यैव संज्ञानस्य विस्तृतं वर्णनं भारतीयप्राचीनेषु शास्त्रेषु विद्यते। तस्य संज्ञानस्य सम्प्रत्ययानां विशिष्टा व्याख्या प्रक्रिया च अस्मिन् शोधपत्रे क्रियते।

**संज्ञानम् –** संज्ञानं मनोवैज्ञानिकः पक्षः वर्तते। भारतीयं मनोविज्ञानं मूलतः आत्मज्ञानं, तस्य लक्ष्यं च निर्धारयति। अतः शिक्षोलक्ष्यमपि आत्मज्ञानमस्ति। अतएव शरीर–मन–बुद्धि–आत्मा इत्यादीनां सर्वांगीणविकाससम्पदानमेव शिक्षायाः शाश्वतम् उद्देश्यं भवति। ज्ञानं मनुजस्य तृतीयं नेत्रमस्ति– ''ज्ञानं तृतीयं मनुजस्य नेत्रं, समस्ततत्वं विलोकिदक्षमम्''। विशेषतया ज्ञानात्मकवृतिः एव प्रधाना भवति। अन्यवृत्तयः यथा इच्छा–क्रिया– प्रवृत्ति इत्यादयः ज्ञानात्मकवृतौ अन्तर्भवन्ति। संज्ञानशब्दः चेतनां दर्शयति। व्यक्तेः चेतना तस्य संज्ञानं तद् लक्षणं च संसूचयति।

तदेव सांख्दर्शने प्रतिपादितम्–

**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।**
**व्यक्तं तथा प्रधानं तद् विपरीतस्तथा च पुमान्।। सां.का.।।**

वस्तुतः सांख्यदर्शने 'ज्ञ' इत्यस्यार्थः ज्ञानस्वरूपं भवति। ज्ञाता भवितुं बुद्धया सह संयुक्तः भवितव्यः चेतना 'ज्ञ' परोक्षः। चेतनायाः चर्चा मनसन्दर्भे अपि भवति। चेतना जीवस्य मूलं लक्षणमस्ति। यथा– **'चेतना लक्षणो जीवः'**। चेतना संज्ञानरूपं वर्तते। यतोहि ज्ञानप्रक्रियायां ज्ञाताज्ञेययोर्मध्ये द्वयोः पृथकास्तित्वम् आवश्यकं जायते। अतः चेतना संज्ञानं च परस्परं सम्बद्धविषयः वर्तते।

सर्वेषु दर्शनेषु ज्ञानं मुक्तेः कारणं स्वीकृतम्। वेदान्ते मीमांसायां च ज्ञानोपरि बलं प्रदत्तम्। सांख्यदर्शने ज्ञानं बुद्धेः कार्यप्राप्तिरुपे स्पष्टीकृतम्–

**अध्यवसायो बुद्धिधर्मः ज्ञानं विराग ऐश्वर्यम्।**
**सात्विकमेतद्पं तामसमस्याद्विपर्यस्तम्।। सां.का. 23**

यजुर्वेदस्य एकस्मिन् मन्त्रे ज्ञानस्य उल्लेखः कृतोऽस्ति। यत्र मनः ज्ञानं शरीरस्य इन्द्रियं सचेतं करोति। यथा–

**यत्प्रज्ञानमुत् चेतो धृतिश्च यज्योतिरन्तरमृतं प्रजासु।**
**यस्मान्नऋते किंचन कर्मक्रियते तन्मे मनः शिवसंकल्पमस्तु।। यजु. 34**

ज्ञानवान् व्यक्तिः एव अस्मिन् संसारे सुखपूर्वंक निवसति यतोहि सः कार्याणि स्वबुद्धया विचार्य करोति। यथाह–

**प्रज्ञावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।**
**ज्ञानं लब्ध्वा परा शान्तिमचिरेणाधिगच्छति।।**

भारतीयमनोवैज्ञानिकपरिप्रेक्ष्ये बुद्धिरुपे संज्ञानम् अंगीकृतम्। ज्ञानार्थबुध्धातोः भावार्थे क्तिन् प्रत्यये कृति सति बुद्धिशब्दो निष्पद्यते। यस्यार्थो ज्ञानमिति। इतोऽपि बुद्धिशब्दस्यार्थाः अमरकोशे वर्णिताः। तद् यथा–

**बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः।**
**प्रेक्षोपलब्धिश्चित् संवित्प्रतिप्रज्ज्ञप्तिचेतनाः।। अ.को.प्र.का.व.प्र. श्लोक**

श्रीमद्भगवद्गीतायां च–

**व्यवसायात्मिका बुद्धिरेकेह कुनन्दन।**
**बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्।। श्री.भ.गी. 2/41**

तर्करुपेऽपि संज्ञानं वर्तते। प्रत्येकं व्यक्तिः चिन्तनं मननं च करोति। अतः तर्कसम्बन्धे चिन्तनेन व्यक्तिः क्रमबद्धरुपात्मकं चिन्तनं व्यवस्थापयति निष्कर्षं च प्राप्नोति। तर्कस्य सामान्यार्थः युक्तिः यश्च अप्रत्यक्षरुपे यथार्थज्ञानं कारणं यथार्थज्ञानं नाम यथार्थोऽर्थाविसंवादी इति तर्कभाषायां लिखितम्। अर्थात् येनरुपेण प्रत्यक्षं जायते तेनैवरूपेण भाषते। यथा– दोषरहितचक्षुरेन्द्रियेणघटादेभनम्। यथा वा धूमादिलिंगेन वह्निर्ज्ञानम्। यथार्थानुमतिरुपेण अनुभवः। अस्माकं जीवनस्य विभिन्नपरिस्थितिषु अपि संज्ञानं निर्णयक्षमतारुणे कार्यं करोति। परिस्थितिजन्यव्यवस्थायां व्यक्तेः सकाशः नैके विकल्पाः भवन्ति, तेष्वपि एकस्य एव चयनं क्रियते। तत्र मनुष्यः संज्ञानं प्रयुज्य निश्चितं निर्णयं स्वकरोति। उक्तं च गीतायाम्–

**योग्स्थः कुरु कर्माणि सङ्ग त्यक्त्वा धनंजय।**
**सिद्धयसिद्धयोः समोभूत्वा समत्वं योग उच्यते।**
**कर्मण्येवाधिकारस्ते मा फलेषु कदाचन**
**मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्व कर्मणि।**

जैनदर्शनेऽपि संज्ञानप्रक्रिया मतिज्ञानं स्पष्टीकर्तुं वर्णिता वर्तते। अर्थात् ज्ञानप्राप्तिप्रक्रिया एका मानसिकप्रक्रियाऽस्ति तत्र वयं वातावरणात् उद्दीपकरुपे पदार्थान् प्राप्नुमः तदेव अन्यवस्थाः यथा परासंज्ञान, अन्तर्ज्ञान, संसारोत्तरचिन्तनंचेति एवं रीत्या पत्रेऽस्मिन् संज्ञानस्य विविधाः आयामाः अत्र चर्चिताः।

**सारांशः –** शिक्षणमाधिगमप्रक्रियायां छात्रः पूर्वज्ञानेन सह सम्बद्धं स्थाप्य नवीनं ज्ञानं प्राप्नोति। बालकस्य बौद्धिकः याः क्रियाः व्यवहाराश्च भवन्ति तैः संज्ञानं संवर्धते। अत्र संज्ञानं शिक्षा च प्रथक्त्वेन नास्ति। अस्य प्रभावेन एव बालकः संज्ञानपुरस्सारं निर्णयं विदधाति।

**सन्दर्भ ग्रन्थ सूची–**


1. शुक्ला, डॉ. श्रीमती लक्ष्मी, 'भारतीय मनोविज्ञान', ईस्टर्नबुक लिंकर्स, दिल्ली, 209
2. जायसवाल, सीताराम, 'भारतीय मनोविज्ञान और शिक्षा', आर्य बुक डिपो, नई दिल्ली, 2009
3. शर्मा, डॉ. हरिप्रकाश, 'भारतीय दर्शन में प्रतयक्ष', परिमल प्रकाशन, नई दिल्ली, 2009
4. अधिकारी, डॉ. हरिप्रसाद, 'भारतीय तत्वमीमांसा', नव शक्ति प्रकाशन, वाराणसी, 2007

5- Hunt & Elis, 'Fundamentals of Cognitive Psychology', new Delhi. TMH Publication, 2007